श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकाञ्चीपूर्ण विरचितम्

# ॥ श्रीदेवराजाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीदेवराजाष्टकम् ॥

श्रीमत्काञ्चीमुनिं वन्दे कमलापतिनन्दनम्।
वरदाङ्घ्रिसदासङ्गरसायनपरायणम्॥

देवराजदयापात्रं श्रीकाञ्चीपूर्णमुत्तमम्।
रामानुजमुनेर्मान्यं वन्देऽहं सज्जनाश्रयम्॥

नमस्ते हस्तिशैलेश! श्रीमन्नम्बुजलोचन!।
शरणं त्वां प्रपन्नोऽस्मि प्रणतार्तिहराच्युत!॥ १॥

समस्तप्राणिसन्त्राणप्रवीण! करुणोल्बण!।
विलसन्तु कटाक्षास्ते मय्यस्मिन् जगतां पते॥ २॥

निन्दिताचारकरणं निवृत्तं कृत्यकर्मणः।
पापीयांसममर्यादं पाहि मां वरदप्रभो॥ ३॥

संसारमरुकान्तारे दुर्व्याधिव्याघ्रभीषणे।
विषयक्षुद्रगुल्माढ्ये तृषापादपशालिनि॥ ४॥

पुत्रदारगृहक्षेत्रमृगतृष्णाम्बुपुष्कले।
कृत्याकृत्यविवेकान्धं परिभ्रान्तमितस्ततः॥ ५॥

अजस्रं जाततृष्णार्तमवसन्नाङ्गमक्षमम्।
क्षीणशक्तिबलारोग्यं केवलं क्लेशसंश्रयम्॥ ६॥

सन्तप्तं विविधैर्दुःखैः दुर्वचैरेवमादिभिः।
देवराज! दयासिन्धो! देवदेव! जगत्पते!॥ ७॥

त्वदीक्षणसुधासिन्धुवीचिविक्षेपशीकरैः।
कारुण्यमारुतानीतैः शीतलैरभिषिञ्च माम्॥ ८॥

॥ इति श्रीदेवराजाष्टकं समाप्तम्॥